# आदर्शप्रश्नपत्रम् 2023-24

## कक्षा - दशमी

## संस्कृतम्  (सम्प्रेषणात्मकम्) कोड् सङ्ख्या - 119

**समयः  होरात्रयम्**  **अङ्कयोजना उत्तरसङ्केताश्च**  **सम्पूर्णाङ्काः  80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. गद्यांशे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | | |
|---|---|---|
| | **भागः ‘क’**<br>**अपठितावबोधनम्** | |
| 1 | **गद्यांशः**<br>**अ  एकपदेन उत्तरत –  (केवलं प्रश्नद्वयम्)**<br>(i) संस्कृतभाषा/संस्कृतम्<br>(ii) ऋतवः<br>(iii) भारतम्/भारतदेशः | 1×2=2 |
| | **आ  पूर्णवाक्येन लिखत -  (केवलं प्रश्नद्वयम्)**<br>(i) भारतीयाः भारतं विश्वगुरुं कर्तुं प्रयतन्ते। | 2×2=4 |

| | | |
|---|---|---|
| | (ii) विविधतायाम् एकता एव अस्माकं संस्कृतेः प्रधानम् अभिधानम्।<br>(iii) भारतस्य वैशिष्ट्यमेतद् सर्वदा निरन्तरं च भवेद् इति सर्वैः भारतीयैः काम्यते।<br>**इ अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत –**<br>विविधतायाम् एकता, भारतस्य विविधता/विशिष्टता।<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः।<br>**ई यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्)**<br>(i) (घ) प्रकृतिः<br>(ii) (ख) अभिधानम्<br>(iii) (ग) अस्ति<br>(iv) (क) अनेकतायाम् | 1<br><br><br>1×3=3 |
| | **भागः 'ख'**<br>**रचनात्मकं कार्यम्** | |
| **2.** | **पत्रलेखनम्**<br><br>परीक्षाभवनात्<br>तिथिः .......................<br><br>प्रिय **(i) तनिष्क** !<br>शुभाशीषः।<br>ह्यः एव मातुः **(ii) पत्रं** प्राप्तम्। माता अद्यत्वे पठने तव **(iii) अरुचिं** दृष्ट्वा चिन्तिता अस्ति। त्वं पठनं त्यक्त्वा चलदूरभाषयन्त्रेण **(iv) क्रीडने** रतः भवसि। अर्धवार्षिक-परीक्षायाम् अपि तव **(v) अङ्काः** न्यूनाः आगताः। एतद् तु न **(vi) उचितम्**। यद्यपि क्रीडनम् अपि **(vii) स्वास्थ्याय** आवश्यकं परं तत् शारीरिकं भवेत्। क्रीडनेन सह पठनम् अपि अत्यावश्यकम्। ये चलदूरभाषयन्त्रेण अत्यधिकं समयं वृथा यापयन्ति ते न केवलं **(viii) मानसिकरूपेण** अस्वस्थाः भवन्ति अपितु जीवने असफलाः अपि। अतः मम **(ix) परामर्शः** अस्ति यत् समयस्य महत्त्वम् अवगत्य **(x) त्वं** ध्यानेन पठ। मातृपितृचरणयोः मे प्रणामाः कथनीयाः।<br>तव अग्रजः,<br>मोहितः | **½×10=5** |
| | | |

| | | |
|---|---|---|
| 3. | **चित्रवर्णनम्**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>**अथवा**<br>**अनुच्छेदलेखनम्**<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | 1×5=5<br><br><br><br><br><br><br>1×5=5 |
| | | |
| 4. | **कथापूर्तिः-**<br>एकः टोपिकाविक्रेता आसीत्। सः एकदा (i) **टोपिकाः** विक्रेतुं ग्रामान्तरं गच्छन् आसीत्। (ii) **मार्गे** सः श्रान्तः अभवत्, अतः (iii) **वृक्षस्य** अधः स्थित्वा शयनम् अकरोत्। तत्र बहवः वानराः आसन्। (iv) **ते** तस्य टोपिकाः स्वीकृत्य वृक्षस्य उपरि अतिष्ठन्। (v) **यदा** टोपिकाविक्रेता जागृतः अभवत् तदा सः टोपिकाः न दृष्ट्वा बहु (vi) **दुःखी** अभवत्। सः एकम् (vii) **उपायम्** अकरोत्। सः वानराणां पुरतः स्थित्वा स्वटोपिकां दूरम् अक्षिपत्। (viii) **अनुकरणशीलाः** वानराः अपि स्व-स्वटोपिकाः अधः (ix) **अक्षिपन्**। चतुरः टोपिकाविक्रेता टोपिकाः एकत्रीकृत्य प्रसन्नः भूत्वा ततः (x) **अगच्छत्**। अतः कथ्यते- बलात् बुद्धिः श्रेष्ठा।<br>**अथवा**<br>**संवादपूर्तिः**<br>**जनकः** - पुत्र केशव! (i) **त्वम् एतावद्-ध्यानेन किं पठसि ?**<br>**पुत्रः** - हे जनक! अहं 'गीतां' पठामि।<br>**जनकः** - शोभनम् , 'गीता' इति बहु उत्तमः ग्रन्थः अस्ति। 'गीता' महाभारतस्य भागः अस्ति यस्मिन् सप्तशत श्लोकाः सन्ति।<br>**पुत्रः** - आम्, (ii) **एतेषु श्लोकेषु श्रीकृष्णस्य ज्ञानवर्धकाः उपदेशाः सन्ति।** | ½×10=5<br><br><br><br><br><br><br><br><br><br>1×5=5 |

| | | |
|---|---|---|
| | **जनकः** - सत्यम्। किं त्वं जानासि यत् महाभारतस्य लेखकः कः अस्ति ?<br>**पुत्रः** - आम् , जनक! **(iii) अस्य लेखकः महर्षिः वेदव्यासः अस्ति।**<br>**जनकः** - उत्तमम्, संस्कृतस्य प्रसिद्धौ ग्रन्थौ कौ ?<br>**पुत्रः** - अहं मन्ये, **(iv) एतौ प्रसिद्धौ ग्रन्थौ 'रामायणम्' 'महाभारतम्' च स्तः।**<br>**जनकः** - सत्यम्, त्वं बहु जानासि। अहं बहु प्रसन्नः अस्मि।<br>**पुत्रः** - धन्यवादः पितः! **(v) अहं पठामि अतः जानामि।** | |
| | | |
| | **भागः 'ग' अनुप्रयुक्तव्याकरणम्** | |
| **5.** | **सन्धिः सन्धिच्छेदश्च (केवलं प्रश्नचतुष्टयम्)**<br>(i) सर्वे+अत्र<br>(ii) ह्येनम्<br>(iii) उत्+दण्डः<br>(iv) क्रोधः + एषः<br>(v) चक्षुर्हीनः | 1×4=4 |
| **6.** | **समासः विग्रहः च (केवलं प्रश्नचतुष्टयम्)**<br>(i) (ख) सूर्योदयस्य भूमिः<br>(ii) (ग) यूथं पाति इति<br>(iii) (ख) यथासमयम्<br>(iv) (क) करुणया सह<br>(v) (घ) व्यासः च नारदः च | 1×4=4 |
| | | |
| **7.** | **प्रत्ययाः (केवलं प्रश्नचतुष्टयम्)**<br>(i) (ख) विपुल + टाप्<br>(ii) (घ) चक्षुस् + मतुप्<br>(iii) (ग) पुरी<br>(iv) (क) सामाजिकम्<br>(v) (ख) अवक्र+तल् | 1×4=4 |
| | | |

| | | |
|---|---|---|
| 8. | **वाच्यम् (केवलं प्रश्नत्रयम्)**<br>(i) अध्ययनम्<br>(ii) अस्माभिः<br>(iii) अहम्<br>(iv) पठ्यते | 1×3=3 |
| | | |
| 9. | **समयः (केवलं प्रश्नत्रयम्)**<br>(i) चतुर्वादने<br>(ii) सपाद-पञ्चवादने<br>(iii) पादोन-अष्टवादने<br>(iv) सार्ध-द्विवादने | 1×3=3 |
| | | |
| 10. | **अव्ययपदानि (केवलं प्रश्नचतुष्टयम्)**<br>(i) इतस्ततः<br>(ii) एव<br>(iii) च<br>(iv) अपि<br>(v) इदानीम् | 1×4=4 |
| | | |
| 11. | **अशुद्धसंशोधनम् (केवलं प्रश्नत्रयम्)**<br>(i) (ख) तौ<br>(ii) (ख) कीदृशी<br>(iii) (घ) जानासि<br>(iv) (क) अपृच्छत् | 1×3=3 |
| | | |
| | **भागः 'घ'**<br>**पठितावबोधनम्** | |
| 12. | **गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) कपयः/वानराः | 5<br>½×2=1 |

| | | |
|---|---|---|
| | (ii) यूथपतिः<br>(iii) तृणेषु<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान्- रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।<br>(ii) मेषः दाहवेदनया भूमौ लुठति।<br>(iii) वह्निना जाज्वल्यमानशरीरः मेषः अश्वशालां प्रविशति।<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) कपयः<br>(ii) साश्रुनयनः<br>(iii) क्षितौ | 1×2=2<br><br>1×2=2 |
| | | |
| **13.** | **पद्यांशः पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) अपूर्वः<br>(ii) सञ्चयात्<br>(iii) सुखम्<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) पापिनां सदा दुःखं भवति।<br>(ii) भारत्याः कोशः व्ययतो वर्धते।<br>(iii) मनुष्यः साधुवृत्तिं समाचरेत्।<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) विद्यते<br>(ii) सुखम्<br>(iii) कोशः | **5**<br>½×2=1<br><br>1×2=2<br><br>1×2=2 |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) पुत्रम् /द्रौणिम्/ अश्वत्थाम्नम्/ द्रौणपुत्रम्/ आचार्यपुत्रम्<br>(ii) द्रौणिम्<br>(iii) चपला | **5**<br>½×2=1 |

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन उत्तरत।** **(केवलं प्रश्नद्वयम्)**<br>(i) यदि ब्रह्मशिरो नाम अस्त्रं प्रयुज्यते तर्हि सर्वा पृथ्वी दग्धा स्यात्।<br>(ii) द्रोणेन अर्जुनाय प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता।<br>(iii) अश्वत्थामा स्वपितुः द्रोणात् ब्रह्मशिरो नाम अस्त्रं प्राप्तवान्।<br>**इ. निर्देशानुसारम् उत्तरत।** **(केवलं प्रश्नद्वयम्)**<br>(i) अलम्<br>(ii) भवान्<br>(iii) पृथ्वी | 1×2=2<br><br><br><br>1×2=2 |
| 15. | **प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः)**<br>(i) मम पिच्छानाम् **कीदृशं** सौन्दर्यम् ?<br>(ii) अयं पुरुषः **किं** चरति ?<br>(iii) राजा **कस्मै** चक्षुः समर्पितवान् ?<br>(iv) एतद् **केषु/कुत्र** न प्रयोक्तव्यम् ?<br>(v) मधुरभाषिणी **का** पुरुषं प्रह्लादयति ?<br>(vi) वयं **कानि** द्रष्टुम् उत्सुकाः स्मः ? | 1×5=5 |
| 16. | **अन्वयः-**<br>**अन्वयः -** पिता पुत्राय **(i) बाल्ये** महत् **(ii) विद्याधनं** यच्छति। अस्य पिता किं तपः **(iii) तेपे** इति **(iv) उक्तिः** तत्कृतज्ञता (मन्यते)।<br>**अथवा**<br>**भावार्थे रिक्तस्थानपूर्तिः**<br>हे महाबाहो! अत्र संशयः नास्ति यत् एतत् **(i) मनः** अतीव चञ्चलम् अस्ति। इदं **(ii) बहुकष्टेन** नियन्त्रितं भवति परन्तु यदि वयं पुनः पुनः **(iii) अभ्यासं** कुर्मः, विरक्ताः च भवामः तदा निश्चयेन एतत् वशीकर्तुं **(iv) शक्नुमः**। | ½×4=2<br><br><br><br>½×4=2 |
| | | |
| 17. | **प्रसङ्गानुकूलम् उचितार्थम्** **(केवलं प्रश्नचतुष्टयम्)**<br>(i) (ग) कल्याणम्<br>(ii) (क) सर्वदायिनी<br>(iii) (ख) भोजनशालाम्<br>(iv) (घ) घटः<br>(v) (ख) वशीकरणम् | 1×4=4 |

| | | |
|---|---|---|
| | | |
| 18. | **पठितकथा-पूर्तिः –**<br>एकदा भगवान् बोधिसत्त्वः (i) **शिवीनां** राजा अभवत्। सः महान् दानी, विनयशीलः, वृद्धोपसेवी च (ii) **आसीत्**। तस्य दानशीलताम् श्रुत्वा (iii) **अन्येभ्यः** देशेभ्योऽपि जनाः तस्य देशम् आयान्ति स्म। एकदा शक्रः अपि तस्य (iv) **दानशीलतां** परीक्षितुम् आगच्छत्। सः नेत्रहीनयाचक-रूपेण आगत्य तं राजानम् एकं (v) **नेत्रम्** अयाचत। राजा तस्मै चक्षुर्द्वयमेव प्रायच्छत्। प्रसन्नः (vi) **शक्रः** कतिपयेभ्यः दिनेभ्यः पश्चात् पुनः राज्ञः पुरतः उपस्थितः अभवत्। सः राज्ञः त्यागवृत्तिं प्रशंसन् नेत्रद्वयमपि प्रत्यस्थापयत्। अपि च शतयोजनपर्यन्तं (vii) **शैलानां** पारं द्रष्टुं समर्थः भव इति तस्मै वरम् अयच्छत्। उच्यते अपि- नास्ति त्यागसमं (viii) **सुखम्**। | ½×8=4 |

-------------0000--------------